

# Chinmaya Dwadasa Jyotirlinga yatra - 2011

# Stotramala






# INDEX

**1. Guru stotram .............4**

**2.Bilwashtakam .............5**

**3.dvādaśa jyotirliṅgāni .............6**

**4.dakṣiṇāmurti stotraṁ .............7**

**5.śrī kālabhairavāṣṭakaṁ .............9**

**6.liṅgāṣṭakam .............10**

**7.śivapaṁcākṣarastotra .............11**

**8.śrīrudrāṣṭakam .............12**

**9.śivāṣṭottaraśata nāmāvaliḥ .............13**

**10.śivāparādhakṣamāpaṇa stotraṁ .............16**

**11.śivamānasapūjā .............19**

**12.rudrapraśnaḥ .............20**

# Guru stotram

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥१

akhaṇḍamaṇḍalākāraṁ vyāptaṁ yena carācaram ।
tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ ।।1

अज्ञानतिमिरान्धस्य ज्ञानांजनशलाकया।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥२

ajñānatimirāndhasya jñānāṁjanaśalākayā ।
cakṣurunmīlitaṁ yena tasmai śrīgurave namaḥ ।।2

गुरुर्ब्रह्मा गुरुर्विष्णूः गुरुर्देवो महेश्वरः।

गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः॥३

gururbrahmā gururviṣṇūḥ gururdevo maheśvaraḥ ।
guruḥ sākṣāt parabrahma tasmai śrīgurave namaḥ ।।3

स्थावरं जङ्गमं व्याप्तं यत्किञ्चित् सचराचरम्।

तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः॥४

sthāvaraṁ jaṅgamaṁ vyāptaṁ yatkiñcit sacarācaram ।
tatpadaṁ darśitaṁ yena tasmai śrī gurave namaḥ ।।4

चिन्मयं व्यापियत्सर्वं त्रैलोक्यं सचराचरम्।

तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः॥५

cinmayaṁ vyāpiyatsarvaṁ trailokyaṁ sacarācaram ।
tatpadaṁ darśitaṁ yena tasmai śrī gurave namaḥ ।।5

सर्वः श्रुतिशिरोरत्नः विराजित-पदाम्बुजः।

वेदान्ताम्बुज-सूर्योयः तस्मै श्री गुरवे नमः॥६

sarvaḥ śrutiśiroratnaḥ virājita-padāmbujaḥ।
vedāntāmbuja-sūryoyaḥ tasmai śrī gurave namaḥ ।।6

चैतन्यः शाश्वतः शान्तः व्योमातीतो निरन्जनः।

बिन्दु-नाद-कलातीतः तस्मै श्री गुरवे नमः॥७

caitanyaḥ śāśvataḥ śāntaḥ vyomātīto niranjanaḥ ।
bindu-nāda-kalātītaḥ tasmai śrī gurave namaḥ ।।7

ज्ञान शक्ति समारूढः तत्व माला विभूषितः।

भुक्ति मुक्ति प्रदात च तस्मै श्री गुरवे नमः॥८

jñāna śakti samārūḍhaḥ tatva mālā vibhūṣitaḥ ।
bhukti mukti pradāta ca tasmai śrī gurave namaḥ ।।8

अनेक जन्म सम्प्राप्त कर्म बन्ध विदाहिने।

आत्म ज्ञान प्रदानेन तस्मै श्री गुरवे नमः॥९

aneka janma samprāpta karma bandha vidāhine ।
ātma jñāna pradānena tasmai śrī gurave namaḥ ।।9

शोषणं भव सिन्धोश्च ज्ञापनं सारसम्पदः।

गुरोर् पादोदकं सम्यक् तस्मै श्री गुरवे नमः॥१०

śoṣaṇaṁ bhava sindhośca jñāpanaṁ sārasampadaḥ ।
guror pādodakaṁ samyak tasmai śrī gurave namaḥ ।।10

न गुरोरधिकं तत्वं न गुरोरधिकं तपः।

तत्व ज्ञानात् परं नास्ति तस्मै श्री गुरवे णमः॥ ११

na guroradhikaṁ tatvaṁ na guroradhikaṁ tapaḥ ।
tatva jñānāt paraṁ nāsti tasmai śrī gurave ṇamaḥ ।। 11

मन्नाथः श्री जगन्नातः मद्गुरुः श्री जगद्गुरुः।

मदात्म सर्व भूतात्म तस्मै श्री गुरवे णमः॥१२

mannāthaḥ śrī jagannātaḥ madguruḥ śrī jagadguruḥ ।
madātma sarva bhūtātma tasmai śrī gurave ṇamaḥ ।।12

गुरुरादिरनादिश्च गुरुः परम दैवतम्।

गुरोः परतरं नास्ति तस्मै श्री गुरवे णमः॥१३

gururādiranādiśca guruḥ parama daivatam ।
guroḥ parataraṁ nāsti tasmai śrī gurave ṇamaḥ ।।13

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।

त्वमेव विद्या द्रविणम् त्वमेव त्वमेव सर्वं मम देव देव॥१४

tvameva mātā ca pitā tvameva tvameva bandhuśca sakhā tvameva ।
tvameva vidyā draviṇam tvameva tvameva sarvaṁ mama deva deva ।।14

# बिल्वाष्टकं

# bilvāṣṭakaṁ

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम्।
त्रिजन्मपापसंहारं एकबिल्वं शिवार्पणम्॥ १॥
त्रिशाखैः बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः।
शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम्॥ २॥
अखण्ड बिल्व पत्रेण पूजिते नन्दिकेश्वरे।
शुद्ध्यन्ति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम्॥ ३॥
शालिग्राम शिलामेकां विप्राणां जातु चार्पयेत्।
सोमयज्ञ महापुण्यं एकबिल्वं शिवार्पणम्॥ ४॥
दन्तिकोटि सहस्राणि वाजपेय शतानि च।
कोटिकन्या महादानं एकबिल्वं शिवार्पणम्॥ ५॥
लक्ष्म्यास्तनुत उत्पन्नं महादेवस्य च प्रियम्।
बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम्॥ ६॥
दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम्।
अघोरपापसंहारं एकबिल्वं शिवार्पणम्॥ ७॥
काशीक्षेत्रनिवासं च कालभैरवदर्शनम्।
प्रयागमाधवं दृष्ट्वा ह्येकबिल्वं शिवार्पणम्॥
मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे।
अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम्॥ ८॥
बिल्वाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ।
सर्वपाप विनिर्मुक्तः शिवलोकमवाप्नुयात्॥

tridalaṁ triguṇākāraṁ trinetraṁ ca triyāyudham ।
trijanmapāpasaṁhāraṁ ekabilvaṁ śivārpaṇam ।। 1।।
triśākhaiḥ bilvapatraiśca hyacchidraiḥ komalaiḥ śubhaiḥ ।
śivapūjāṁ kariṣyāmi hyekabilvaṁ śivārpaṇam ।। 2।।
akhaṇḍa bilva patreṇa pūjite nandikeśvare ।
śuddhyanti sarvapāpebhyo hyekabilvaṁ śivārpaṇam ।। 3।।
śāligrāma śilāmekāṁ viprāṇāṁ jātu cārpayet ।
somayajña mahāpuṇyaṁ ekabilvaṁ śivārpaṇam ।। 4।।
dantikoṭi sahasrāṇi vājapeya śatāni ca ।
koṭikanyā mahādānaṁ ekabilvaṁ śivārpaṇam ।। 5।।
lakṣmyāstanuta utpannaṁ mahādevasya ca priyam ।
bilvavṛkṣaṁ prayacchāmi hyekabilvaṁ śivārpaṇam ।। 6।।
darśanaṁ bilvavṛkṣasya sparśanaṁ pāpanāśanam ।
aghorapāpasaṁhāraṁ ekabilvaṁ śivārpaṇam ।। 7।।
kāśīkṣetranivāsaṁ ca kālabhairavadarśanam ।
prayāgamādhavaṁ dṛṣṭvā hyekabilvaṁ śivārpaṇam ।।
mūlato brahmarūpāya madhyato viṣṇurūpiṇe ।
agrataḥ śivarūpāya hyekabilvaṁ śivārpaṇam ।। 8।।
bilvāṣṭakamidaṁ puṇyaṁ yaḥ paṭhet śivasannidhau ।
sarvapāpa vinirmuktaḥ śivalokamavāpnuyāt ।।

## ॥ द्वादश ज्योतिर्लिङ्गानि ॥

## | | dvādaśa jyotirliṅgāni | |

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम्।

उज्जयिन्यां महाकालमोङ्कारममलेश्वरम्॥

saurāṣṭre somanāthaṁ ca śrīśaile mallikārjunam ।
ujjayinyāṁ mahākālamoṅkāramamaleśvaram । ।

परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम्।

सेतुबन्धे तु रामेशं नागेशं दारुकावने॥

paralyāṁ vaidyanāthaṁ ca ḍākinyāṁ bhīmaśaṅkaram ।
setubandhe tu rāmeśaṁ nāgeśaṁ dārukāvane । ।

वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे।

हिमालये तु केदारं घुश्मेशं च शिवालये॥

vārāṇasyāṁ tu viśveśaṁ tryambakaṁ gautamītaṭe ।
himālaye tu kedāraṁ ghuśmeśaṁ ca śivālaye । ।

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः।

सप्तजन्मकृतं पापं स्मरणेन विनश्यति॥

etāni jyotirliṅgāni sāyaṁ prātaḥ paṭhennaraḥ ।
saptajanmakṛtaṁ pāpaṁ smaraṇena vinaśyati । ।

एतेशां दर्शनादेव पातकं नैव तिष्ठति।

कर्मक्षयो भवेत्तस्य यस्य तुष्टो महेश्वराः॥

eteśāṁ darśanādeva pātakaṁ naiva tiṣṭhati ।
karmakṣayo bhavettasya yasya tuṣṭo maheśvarāḥ । ।

# <u>दक्षिणामुर्ति स्तोत्रं</u>
# <u>dakṣiṇāmurti stotraṁ</u>

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यदा निद्रया।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ १॥
बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्गिर्विकल्पं पुनः
मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम्।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ २॥
यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान्।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ३॥
नानाच्छिद्रघटोदरस्थितहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ४॥
देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।
मायाशक्तिविलासकल्पितमहा व्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ५॥
राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान्।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ६॥
बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ७॥
विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबन्धतः
शिष्याचार्यतया तयैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ८॥
भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥ ९॥
सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात्।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम्॥ १०॥

viśvaṁ darpaṇadṛśyamānanagarītulyaṁ nijāntargataṁ
paśyannātmani māyayā bahirivodbhūtaṁ yadā nidrayā
yaḥ sākṣātkurute prabodhasamaye
svātmānamevādvayaṁ
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 1| |
bījasyāntarivāṅkuro jagadidaṁ prāṅnirvikalpaṁ punaḥ
māyākalpitadeśakālakalanāvaicitryacitrīkṛtam |
māyāvīva vijṛmbhayatyapi mahāyogīva yaḥ svecchayā
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 2| |
yasyaiva sphuraṇaṁ sadātmakamasatkalpārthakaṁ
bhāsate
sākṣāttattvamasīti vedavacasā yo bodhayatyāśritān |
yatsākṣātkaraṇādbhavenna
punarāvṛttirbhavāmbhonidhau
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 3| |
nānācchidraghaṭodarasthitahādīpaprabhābhāsvaraṁ
jñānaṁ yasya tu cakṣurādikaraṇadvārā bahiḥ spandate
|
jānāmīti tameva bhāntamanubhātyetatsamastaṁ jagat
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 4| |
dehaṁ prāṇamapīndriyāṇyapi calāṁ buddhiṁ ca
śūnyaṁ viduḥ
strībālāndhajaḍopamāstvahamiti bhrāntā bhṛśaṁ
vādinaḥ |
māyāśaktivilāsakalpitamahā vyāmohasaṁhāriṇe
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 5| |
rāhugrastadivākarendusadṛśo māyāsamācchādanāt
sanmātraḥ karaṇopasaṁharaṇato yo'bhūtsuṣuptaḥ
pumān |
prāgasvāpsamiti prabodhasamaye yaḥ pratyabhijñāyate
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 6| |
bālyādiṣvapi jāgradādiṣu tathā sarvāsvavasthāsvapi
vyāvṛttāsvanuvartamānamahamityantaḥ sphurantaṁ
sadā |
svātmānaṁ prakaṭīkaroti bhajatāṁ yo mudrayā
bhadrayā
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 7| |
viśvaṁ paśyati kāryakāraṇatayā
svasvāmisaṁbandhataḥ
śiṣyācāryatayā tayaiva pitṛputrādyātmanā bhedataḥ |
svapne jāgrati vā ya eṣa puruṣo māyāparibhrāmitaḥ
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 8| |
bhūrambhāṁsyanalo'nilo'mbaramaharnātho himāṁśuḥ
pumān
ityābhāti carācarātmakamidaṁ yasyaiva mūrtyaṣṭakam
|
nānyatkiñcana vidyate vimṛśatāṁ
yasmātparasmādvibhoḥ
tasmai śrīgurumūrtaye nama idaṁ śrīdakṣiṇāmūrtaye
| | 9| |
sarvātmatvamiti sphuṭīkṛtamidaṁ yasmādamuṣmin
stave
tenāsya śravaṇāttadarthamananāddhyānācca
saṅkīrtanāt |
sarvātmatvamahāvibhūtisahitaṁ syādīśvaratvaṁ svataḥ
siddhyettatpunaraṣṭadhā pariṇataṁ
caiśvaryamavyāhatam | | 10| |

# ॥ श्री कालभैरवाष्टकं ॥

## | | śrī kālabhairavāṣṭakaṁ | |

देवराजसेव्यमानपावनांघ्रिपङ्कजं

व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम्।

नारदादियोगिवृन्दवन्दितं दिगंबरं

काशिकापुराधिनाथकालभैरवं भजे॥ १॥

भानुकोटिभास्वरं भवाब्धितारकं परं

नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम्।

कालकालमंबुजाक्शमक्शशूलमक्शरं

काशिकापुराधिनाथकालभैरवं भजे॥ २॥

शूलटंकपाशदण्डपाणिमादिकारणं

श्यामकायमादिदेवमक्शरं निरामयम्।

भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं

काशिकापुराधिनाथकालभैरवं भजे॥ ३॥

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं

भक्तवत्सलं स्थितं समस्तलोकविग्रहम्।

विनिक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं

काशिकापुराधिनाथकालभैरवं भजे॥ ४॥

धर्मसेतुपालकं त्वधर्ममार्गनाशनं

कर्मपाशमोचकं सुशर्मधायकं विभुम्।

स्वर्णवर्णशेषपाशशोभितांगमण्डलं

काशिकापुराधिनाथकालभैरवं भजे॥ ५॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं

नित्यमद्वितीयमिष्टदैवतं निरंजनम्।

मृत्युदर्पनाशनं करालदंष्ट्रमोक्शणं

काशिकापुराधिनाथकालभैरवं भजे॥ ६॥

अट्टहासभिन्नपद्मजाण्डकोशसंततिं

दृष्टिपात्तनष्टपापजालमुग्रशासनम्।

अष्टसिद्धिदायकं कपालमालिकाधरं

काशिकापुराधिनाथकालभैरवं भजे॥ ७॥

भूतसंघनायकं विशालकीर्तिदायकं

काशिवासलोकपुण्यपापशोधकं विभुम्।

नीतिमार्गकोविदं पुरातनं जगत्पतिं

काशिकापुराधिनाथकालभैरवं भजे॥ ८॥

कालभैरवाष्टकं पठंति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम्।

शोकमोहदैन्यलोभकोपतापनाशनं प्रयान्ति कालभैरवांघ्रिसन्निधिं नरा

ध्रुवम्

॥ इति श्रीमछंकराचार्यविरचितं श्री कालभैरवाष्टकं संपूर्णम्॥

devarājasevyamānapāvanāṁghripaṅkajaṁ
vyālayajñasūtramınduśekharaṁ kṛpākaram |
nāradādiyogivṛndavanditaṁ digaṁbaraṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 1 | |
bhānukoṭibhāsvaraṁ bhavābdhitārakaṁ paraṁ
nīlakaṇṭhamīpsitārthadāyakaṁ trilocanam |
kālakālamaṁbujākśamakśaśūlamakśaraṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 2 | |
śūlaṭaṁkapāśadaṇḍapāṇimādikāraṇaṁ
śyāmakāyamādidevamakśaraṁ nirāmayam |
bhīmavikramaṁ prabhuṁ vicitratāṇḍavapriyaṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 3 | |
bhuktimuktidāyakaṁ praśastacāruvigrahaṁ
bhaktavatsalaṁ sthitaṁ samastalokavigraham |
vinikvaṇanmanojñahemakiṅkiṇīlasatkaṭiṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 4 | |
dharmasetupālakaṁ tvadharmamārganāśanaṁ
karmapāśamocakaṁ suśarmadhāyakaṁ vibhum |
svarṇavarṇaśeṣapāśaśobhitāṁgamaṇḍalaṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 5 | |
ratnapādukāprabhābhirāmapādayugmakaṁ
nityamadvitīyamiṣṭadaivataṁ niraṁjanam |
mṛtyudarpanāśanaṁ karāladaṁṣṭramokśaṇaṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 6 | |
aṭṭahāsabhinnapadmajāṇḍakośasaṁtatiṁ
dṛṣṭipāttanaṣṭapāpajālamugraśāsanam |
aṣṭasiddhidāyakaṁ kapālamālikādharaṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 7 | |
bhūtasaṁghanāyakaṁ viśālakīrtidāyakaṁ
kāśivāsalokapuṇyapāpaśodhakaṁ vibhum |
nītimārgakovidaṁ purātanaṁ jagatpatiṁ
kāśikāpurādhināthakālabhairavaṁ bhaje | | 8 | |
kālabhairavāṣṭakaṁ paṭhaṁti ye manoharaṁ
jñānamuktisādhanaṁ vicitrapuṇyavardhanam |
śokamohadainyalobhakopatāpanāśanaṁ
prayānti kālabhairavāṁghrisannidhiṁ narā

dhruvam
| | iti śrīmachaṁkarācāryaviracitaṁ śrī kālabhairavāṣṭakaṁ saṁpūrṇam | |

## लिङ्गाष्टकम्॥
## liṅgāṣṭakam | |

ब्रह्ममुरारिसुरार्चितलिङ्गम् निर्मलभासितशोभितलिङ्गम्।
जन्मजदुःखविनाशकलिङ्गम् तत् प्रणमामि सदाशिवलिङ्गम्॥
देवमुनिप्रवरार्चितलिङ्गम् कामदहम् करुणाकर लिङ्गम्।
रावणदर्पविनाशनलिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम्॥ २॥
सर्वसुगन्धिसुलेपितलिङ्गम् बुद्धिविवर्धनकारणलिङ्गम्।
सिद्धसुरासुरवन्दितलिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम्॥
कनकमहामणिभूषितलिङ्गम् फनिपतिवेष्टित शोभित लिङ्गम्।
दक्षसुयज्ञ विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम्॥
४॥
कुङ्कुमचन्दनलेपितलिङ्गम् पङ्कजहारसुशोभितलिङ्गम्।
सञ्चितपापविनाशनलिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम्॥
५॥
देवगणार्चित सेवितलिङ्गम् भावैर्भक्तिभिरेव च लिङ्गम्।
दिनकरकोटिप्रभाकरलिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम्॥
६॥
अष्टदलोपरिवेष्टितलिङ्गम् सर्वसमुद्भवकारणलिङ्गम्।
अष्टदरिद्रविनाशितलिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम्॥
सुरगुरुसुरवरपूजित लिङ्गम् सुरवनपुष्प सदार्चित लिङ्गम्।
परात्परं परमात्मक लिङ्गम्  तत् प्रणमामि सदाशिव लिङ्गम्॥
लिङ्गाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

brahmamurārisurārcitaliṅgam
nirmalabhāsitaśobhitaliṅgam |
janmajaduḥkhavināśakaliṅgam tat
praṇamāmi sadāśivaliṅgam | | 1| |
devamunipravarārcitaliṅgam kāmadaham
karuṇākara liṅgam |
rāvaṇadarpavināśanaliṅgam tat praṇamāmi
sadāśiva liṅgam | | 2| |
sarvasugandhisulepitaliṅgam
buddhivivardhanakāraṇaliṅgam |
siddhasurāsuravanditaliṅgam tat
praṇamāmi sadāśiva liṅgam | | 3| |
kanakamahāmaṇibhūṣitaliṅgam
phanipativeṣṭita śobhita liṅgam |
dakṣasuyajña vināśana liṅgam tat
praṇamāmi sadāśiva liṅgam | | 4| |
kuṅkumacandanalepitaliṅgam
paṅkajahārasuśobhitaliṅgam |
sañcitapāpavināśanaliṅgam tat praṇamāmi
sadāśiva liṅgam | | 5| |
devagaṇārcita sevitaliṅgam
bhāvairbhaktibhireva ca liṅgam |
dinakarakoṭiprabhākaraliṅgam tat
praṇamāmi sadāśiva liṅgam | | 6| |
aṣṭadaloparivеṣṭitaliṅgam
sarvasamudbhavakāraṇaliṅgam |
aṣṭadaridravināśitaliṅgam tat praṇamāmi
sadāśiva liṅgam | | 7| |
suragurusuravarapūjita liṅgam
suravanapuṣpa sadārcita liṅgam |
parātparaṁ paramātmaka liṅgam  tat
praṇamāmi sadāśiva liṅgam | | 8| |
liṅgāṣṭakamidaṁ puṇyaṁ yaḥ paṭhet
śivasannidhau |
śivalokamavāpnoti śivena saha modate | |

# शिवपंचाक्षरस्तोत्र
# śivapaṁcākṣarastotra

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय
तस्मै नकाराय नमः शिवाय॥ १॥
मन्दाकिनि-सलिलचन्दन-चर्चिताय
नन्दीश्वर-प्रमथनाथ- महेश्वराय।
मन्दारपुष्प-बहुपुष्प-सुपूजिताय
तस्मै मकाराय नमः शिवाय॥ २॥
शिवाय गौरीवदनाब्ज-वृन्द-
सूर्याय दक्षाध्वरनाशकाय।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै शिकाराय नमः शिवाय॥ ३॥
वसिष्ठ-कुम्भोद्भव-गौतमार्य
मुनीन्द्र-देवार्चितशेखराय।
चन्द्रार्क-वैश्वानरलोचनाय
तस्मै वकाराय नमः शिवाय॥ ४॥
यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय।
दिव्याय देवाय दिगम्बराय
तस्मै यकाराय नमः शिवाय॥ ५॥
पंचाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते॥

nāgendrahārāya trilocanāya
bhasmāṅgarāgāya maheśvarāya ।
nityāya śuddhāya digambarāya
tasmai nakārāya namaḥ śivāya ।। 1।।
mandākini-salilacandana-carcitāya
nandīśvara-pramathanātha- maheśvarāya ।
mandārapuṣpa-bahupuṣpa-supūjitāya
tasmai makārāya namaḥ śivāya ।। 2।।
śivāya gaurīvadanābja-vṛnda-
sūryāya dakṣādhvaranāśakāya ।
śrīnīlakaṇṭhāya vṛṣadhvajāya
tasmai śikārāya namaḥ śivāya ।। 3।।
vasiṣṭha-kumbhodbhava-gautamārya
munīndra-devārcitaśekharāya ।
candrārka-vaiśvānaralocanāya
tasmai vakārāya namaḥ śivāya ।। 4।।
yakṣasvarūpāya jaṭādharāya
pinākahastāya sanātanāya ।
divyāya devāya digambarāya
tasmai yakārāya namaḥ śivāya ।। 5।।
paṁcākṣaramidaṁ puṇyaṁ yaḥ
paṭhecchivasannidhau ।
śivalokamavāpnoti śivena saha modate ।।

## ॥ श्रीरुद्राष्टकम्॥

## || śrīrudrāṣṭakam ||

नमामीशमीशान निर्वाणरूपं विभुं व्यापकं ब्रह्मवेदस्वरूपम्।
निजं निर्गुणं निर्विकल्पं निरीहं चिदाकाशमाकाशवासं भजेऽहम्
॥ १॥
निराकारमोंकारमूलं तुरीयं गिरा ज्ञान गोतीतमीशं गिरीशम्।
करालं महाकाल कालं कृपालं गुणागार संसारपारं नतोऽहम्॥
२॥
तुषाराद्रि संकाश गौरं गभीरं मनोभूत कोटिप्रभा श्री शरीरम्।
स्फुरन्मौलि कल्लोलिनी चारु गङ्गा लसद्भालबालेन्दु कण्ठे
भुजङ्गा॥ ३॥
चलत्कुण्डलं भ्रू सुनेत्रं विशालं प्रसन्नाननं नीलकण्ठं दयालम्।
मृगाधीशचर्माम्बरं मुण्डमालं प्रियं शंकरं सर्वनाथं भजामि॥ ४
प्रचण्डं प्रकृष्टं प्रगल्भं परेशं अखण्डं अजं भानुकोटिप्रकाशम्।
त्रयः शूल निर्मूलनं शूलपाणिं भजेऽहं भवानीपतिं भावगम्यम्॥
कलातीत कल्याण कल्पान्तकारी सदा सज्जनानन्ददाता
पुरारी।
चिदानन्द संदोह मोहापहारी प्रसीद प्रसीद प्रभो मन्मथारी॥ ६
न यावत् उमानाथ पादारविन्दं भजन्तीह लोके परे वा नराणाम्
न तावत् सुखं शान्ति सन्तापनाशं प्रसीद प्रभो
सर्वभूताधिवासम्॥ ७॥
न जानामि योगं जपं नैव पूजां नतोऽहं सदा सर्वदा शम्भु
तुभ्यम्।
जरा जन्म दुःखौघ तातप्यमानं प्रभो पाहि आपन्नमामीश
शम्भो॥ ८॥
रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतोषये।
ये पठन्ति नरा भक्त्या तेषां शम्भुः प्रसीदति॥
॥ इति श्रीगोस्वामितुलसीदासकृतं श्रीरुद्राष्टकं संपूर्णम्॥

namāmīśamīśāna nirvāṇarūpaṁ vibhuṁ
vyāpakaṁ brahmavedasvarūpam |
nijaṁ nirguṇaṁ nirvikalpaṁ nirīhaṁ
cidākāśamākāśavāsaṁ bhaje'ham || 1||
nirākāramoṁkāramūlaṁ turīyaṁ girā jñāna
gotītamīśaṁ girīśam |
karālaṁ mahākāla kālaṁ kṛpālaṁ guṇāgāra
saṁsārapāraṁ nato'ham || 2||
tuṣārādri saṁkāśa gauraṁ gabhīraṁ
manobhūta koṭiprabhā śrī śarīram |
sphuranmauli kallolinī cāru gaṅgā
lasadbhālabālendu kaṇṭhe bhujaṅgā || 3||
calatkuṇḍalaṁ bhrū sunetraṁ viśālaṁ
prasannānanaṁ nīlakaṇṭhaṁ dayālam |
mṛgādhīśacarmāmbaraṁ muṇḍamālaṁ
priyaṁ śaṁkaraṁ sarvanāthaṁ bhajāmi ||
4||
pracaṇḍaṁ prakṛṣṭaṁ pragalbhaṁ pareśaṁ
akhaṇḍaṁ ajaṁ bhānukoṭiprakāśam |
trayaḥ śūla nirmūlanaṁ śūlapāṇiṁ
bhaje'haṁ bhavānīpatiṁ bhāvagamyam ||
5||
kalātīta kalyāṇa kalpāntakārī sadā
sajjanānandadātā purārī |
cidānanda saṁdoha mohāpahārī prasīda
prasīda prabho manmathārī || 6||
na yāvat umānātha pādāravindaṁ
bhajantīha loke pare vā narāṇām |
na tāvat sukhaṁ śānti santāpanāśaṁ
prasīda prabho sarvabhūtādhivāsam ||
7||
na jānāmi yogaṁ japaṁ naiva pūjāṁ
nato'haṁ sadā sarvadā śambhu tubhyam |
jarā janma duḥkhaugha tātapyamānaṁ
prabho pāhi āpannamāmīśa śambho || 8||
rudrāṣṭakamidaṁ proktaṁ vipreṇa
haratoṣaye |
ye paṭhanti narā bhaktyā teṣāṁ śambhuḥ
prasīdati ||
|| iti śrīgosvāmitulasīdāsakṛtaṁ
śrīrudrāṣṭakaṁ saṁpūrṇam ||

# ॥ शिवाष्टोत्तरशत नामावलिः॥

## | | śivāṣṭottaraśata nāmāvaliḥ | |

कर्पूर-गौरं करुणावतारं संसार-सारं भुजगेन्द्र-हारम्।

सदा वसन्तं ह्यदयारविन्दं भवं भवानी सहितं नमामि॥

karpūra-gauraṁ karuṇāvatāraṁ saṁsāra-sāraṁ bhujagendra-hāram।
sadā vasantaṁ hyadayāravindaṁ bhavaṁ bhavānī sahitaṁ namāmi।।

1. ॐ शिवाय नमः।
2. ॐ महेश्वराय नमः।
3. ॐ शंभवे नमः।
4. ॐ पिनाकिने नमः।
5. ॐ शशिशेखराय नमः।
6. ॐ वामदेवाय नमः।
7. ॐ विरूपाक्षाय नमः।
8. ॐ कपर्दिने नमः।
9. ॐ नीललोहिताय नमः।
10. ॐ शंकराय नमः।
11. ॐ शूलपाणिने नमः।
12. ॐ खट्वांगिने नमः।
13. ॐ विष्णुवल्लभाय नमः।
14. ॐ शिपिविष्टाय नमः।
15. ॐ अंबिकानाथाय नमः।
16. ॐ श्रीकण्ठाय नमः।
17. ॐ भक्तवत्सलाय नमः।
18. ॐ भवाय नमः।
19. ॐ शर्वाय नमः।
20. ॐ त्रिलोकेशाय नमः।
21. ॐ शितिकण्ठाय नमः।
22. ॐ शिव प्रियाय नमः।
23. ॐ उग्राय नमः।
24. ॐ कपालिने नमः।
25. ॐ कामारये नमः।
26. ॐ अन्धकासुरसूदनाय नमः।
27. ॐ गंगाधराय नमः।
28. ॐ ललाटाक्षाय नमः।
29. ॐ कलिकालाय नमः।
30. ॐ कृपानिधये नमः।
31. ॐ भीमाय नमः।
32. ॐ परशुहस्ताय नमः।
33. ॐ मृगपाणये नमः।
34. ॐ जटाधराय नमः।
35. ॐ कैलाशवासिने नमः।
36. ॐ कवचिने नमः।
37. ॐ कठोराय नमः।
38. ॐ त्रिपुरान्तकाय नमः।
39. ॐ वृषंगिणे नमः।
40. ॐ वृषभारूढाय नमः।
41. ॐ भस्मोद्धूलित विग्रहाय नमः।
42. ॐ सामप्रियाय नमः।
43. ॐ स्वरमयाय नमः।
44. ॐ त्रयीमूर्तये नमः।
45. ॐ अनीश्वराय नमः।
46. ॐ सर्वज्ञाय नमः।
47. ॐ परमात्मने नमः।
48. ॐ सोमसूर्याग्निलोचनाय नमः।
49. ॐ हविषे नमः।
50. ॐ यज्ञमयाय नमः।
51. ॐ सोमाय नमः।
52. ॐ पंचवक्त्राय नमः।
53. ॐ सदाशिवाय नमः।
54. ॐ विश्वेश्वराय नमः।
55. ॐ वीरभद्राय नमः।
56. ॐ गणनाथाय नमः।
57. ॐ प्रजापतये नमः।
58. ॐ हिरण्यरेतसे नमः।
59. ॐ दुर्धर्षाय नमः।
60. ॐ गिरीशाय नमः।
61. ॐ अनघाय नमः।
62. ॐ भुजंगभूषणाय नमः।
63. ॐ भर्गाय नमः।

64. ॐ गिरिधन्वने नमः।
65. ॐ गिरिप्रियाय नमः।
66. ॐ कृत्तिवाससे नमः।
67. ॐ पुरारातये नमः।
68. ॐ भगवते नमः।
69. ॐ प्रमथाधिपाय नमः।
70. ॐ मृत्युंजयाय नमः।
71. ॐ सूक्ष्मतनवे नमः।
72. ॐ जगद्व्यापिने नमः।
73. ॐ जगद्गुरुवे नमः।
74. ॐ व्योमकेशाय नमः।
75. ॐ महासेनजनकाय नमः।
76. ॐ चारुविक्रमाय नमः।
77. ॐ रुद्राय नमः।
78. ॐ भूतपतये नमः।
79. ॐ स्थाणवे नमः।
80. ॐ अहिर्बुध्न्याय नमः।
81. ॐ दिगंबराय नमः।
82. ॐ अष्टमूर्तये नमः।
83. ॐ अनेकात्मने नमः।
84. ॐ सात्विकाय नमः।
85. ॐ शुद्धविग्रहाय नमः।
86. ॐ शाश्वताय नमः।
87. ॐ खण्डपरशवे नमः।
88. ॐ रजसे नमः।
89. ॐ पाशविमोचनाय नमः।
90. ॐ मृडाय नमः।
91. ॐ पशुपतये नमः।
92. ॐ देवाय नमः।
93. ॐ महादेवाय नमः।
94. ॐ अव्ययाय नमः।
95. ॐ हरिपूषणे नमः।
96. ॐ दन्तभिदे नमः।
97. ॐ त्रिलोचनाय नमः।
98. ॐ अव्यग्राय नमः।
99. ॐ दक्षाध्वरहराय नमः।
100. ॐ हराय नमः।
101. ॐ भगनेत्रभिदे नमः।
102. ॐ अव्यक्ताय नमः।
103. ॐ सहस्राक्षाय नमः।
104. ॐ सहस्रपदे नमः।
105. ॐ अपवर्गप्रदाय नमः।
106. ॐ अनन्ताय नमः।
107. ॐ तारकाय नमः।
108. ॐ परमेश्वराय नमः।

॥ इति श्रीशिवाष्टोत्तरशत नामावलिः ॥

1. om śivāya namaḥ ।
2. om maheśvarāya namaḥ ।
3. om śaṁbhave namaḥ ।
4. om pinākine namaḥ ।
5. om śaśiśekharāya namaḥ ।
6. om vāmadevāya namaḥ ।
7. om virūpākṣāya namaḥ ।
8. om kapardine namaḥ ।
9. om nīlalohitāya namaḥ ।
10. om śaṁkarāya namaḥ ।
11. om śūlapāṇine namaḥ ।
12. om khaṭvāṁgine namaḥ ।
13. om viṣṇuvallabhāya namaḥ ।
14. om śipiviṣṭāya namaḥ ।
15. om aṁbikānāthāya namaḥ ।
16. om śrīkaṇṭhāya namaḥ ।
17. om bhaktavatsalāya namaḥ ।
18. om bhavāya namaḥ ।
19. om śarvāya namaḥ ।
20. om trilokeśāya namaḥ ।
21. om śitikaṇṭhāya namaḥ ।
22. om śiva priyāya namaḥ ।
23. om ugrāya namaḥ ।
24. om kapāline namaḥ ।
25. om kāmāraye namaḥ ।
26. om andhakāsurasūdanāya namaḥ ।
27. om gaṁgādharāya namaḥ ।
28. om lalāṭākṣāya namaḥ ।
29. om kalikālāya namaḥ ।

30. om kṛpānidhaye namaḥ ।
31. om bhīmāya namaḥ ।
32. om paraśuhastāya namaḥ ।
33. om mṛgapāṇaye namaḥ ।
34. om jaṭādharāya namaḥ ।
35. om kailāśavāsine namaḥ ।
36. om kavacine namaḥ ।
37. om kaṭhorāya namaḥ ।
38. om tripurāntakāya namaḥ ।
39. om vṛṣaṁgiṇe namaḥ ।
40. om vṛṣabhārūḍhāya namaḥ ।
41. om bhasmoddhūlita vigrahāya namaḥ ।
42. om sāmapriyāya namaḥ ।
43. om svaramayāya namaḥ ।
44. om trayīmūrtaye namaḥ ।
45. om anīśvarāya namaḥ ।
46. om sarvajñāya namaḥ ।
47. om paramātmane namaḥ ।
48. om somasūryāgnilocanāya namaḥ ।
49. om haviṣe namaḥ ।
50. om yajñamayāya namaḥ ।
51. om somāya namaḥ ।
52. om paṁcavaktrāya namaḥ ।
53. om sadāśivāya namaḥ ।
54. om viśveśvarāya namaḥ ।
55. om vīrabhadrāya namaḥ ।
56. om gaṇanāthāya namaḥ ।
57. om prajāpataye namaḥ ।
58. om hiraṇyaretase namaḥ ।
59. om durdharṣāya namaḥ ।
60. om girīśāya namaḥ ।
61. om anaghāya namaḥ ।
62. om bhujaṁgabhūṣaṇāya namaḥ ।
63. om bhargāya namaḥ ।
64. om giridhanvane namaḥ ।
65. om giripriyāya namaḥ ।
66. om kṛttivāsase namaḥ ।
67. om purārātaye namaḥ ।
68. om bhagavate namaḥ ।
69. om pramathādhipāya namaḥ ।
70. om mṛtyuṁjayāya namaḥ ।
71. om sūkṣmatanave namaḥ ।
72. om jagadvyāpine namaḥ ।
73. om jagadguruve namaḥ ।
74. om vyomakeśāya namaḥ ।
75. om mahāsenajanakāya namaḥ ।
76. om cāruvikramāya namaḥ ।
77. om rudrāya namaḥ ।
78. om bhūtapataye namaḥ ।
79. om sthāṇave namaḥ ।
80. om ahirbudhnyāya namaḥ ।
81. om digaṁbarāya namaḥ ।
82. om aṣṭamūrtaye namaḥ ।
83. om anekātmane namaḥ ।
84. om sātvikāya namaḥ ।
85. om śuddhavigrahāya namaḥ ।
86. om śāśvatāya namaḥ ।
87. om khaṇḍaparaśave namaḥ ।
88. om rajase namaḥ ।
89. om pāśavimocanāya namaḥ ।
90. om mṛḍāya namaḥ ।
91. om paśupataye namaḥ ।
92. om devāya namaḥ ।
93. om mahādevāya namaḥ ।
94. om avyayāya namaḥ ।
95. om haripūṣaṇee namaḥ ।
96. om dantabhide namaḥ ।
97. om trilocanāya namaḥ ।
98. om avyagrāya namaḥ ।
99. om dakṣādhvaraharāya namaḥ ।
100. om harāya namaḥ ।
101. om bhaganetrabhide namaḥ ।
102. om avyaktāya namaḥ ।
103. om sahasrākṣāya namaḥ ।
104. om sahasrapade namaḥ ।
105. om apavargapradāya namaḥ ।
106. om anantāya namaḥ ।
107. om tārakāya namaḥ ।
108. om parameśvarāya namaḥ ।

।। iti śrīśivāṣṭottaraśata nāmāvaliḥ ।।

# शिवापराधक्षमापण स्तोत्रं
# śivāparādhakṣamāpaṇa stotraṁ

आदौ कर्मप्रसङ्गात्कलयति कलुषं मातृकुक्षौ स्थितं मां
विण्मूत्रामेध्यमध्ये कथयति नितरां जाठरो जातवेदाः।
यद्यद्वै तत्र दुःखं व्यथयति नितरां शक्यते केन वक्तुं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
१॥

बाल्ये दुःखातिरेको मललुलितवपुः स्तन्यपाने पिपासा
नो शक्तश्चेन्द्रियेभ्यो भवगुणजनिताः जन्तवो मां तुदन्ति।
नानारोगादिदुःखाद्रुदनपरवशः शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
२॥

प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ
दष्टो नष्टोऽविवेकः सुतधनयुवतिस्वादुसौख्ये निषण्णः।
शैवीचिन्ताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
३॥

वार्धक्ये चेन्द्रियाणां विगतगतिमतिश्चाधिदैवादितापैः
पापै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढहीनं च दीनम्।
मिथ्यामोहाभिलाषैर्भ्रमति मम मनो धूर्जटेर्ध्यानशून्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
४॥

नो शक्यं स्मार्तकर्म प्रतिपदगहनप्रत्यवायाकुलाख्यं
श्रौते वार्ता कथं मे द्विजकुलविहिते ब्रह्ममार्गेऽसुसारे।
ज्ञातो धर्मो विचारैः श्रवणमननयोः किं निदिध्यासितव्यं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
५॥

स्नात्वा प्रत्यूषकाले स्नपनविधिविधौ नाहृतं गाङ्गतोयं
पूजार्थं वा कदाचिद्बहुतरगहनात्खण्डबिल्वीदलानि।
नानीता पद्ममाला सरसि विकसिता गन्धधूपैः त्वदर्थं
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
६॥

दुग्धैर्मध्वाज्युतैर्दधिसितसहितैः स्नापितं नैव लिङ्गं
नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः।
धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
७॥

ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो
हव्यं ते लक्षसङ्ख्यैर्हुतवहवदने नार्पितं बीजमन्त्रैः।
नो तप्तं गाङ्गातीरे व्रतजननियमैः रुद्रजाप्यैर्न वेदैः
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
८॥

स्थित्वा स्थाने सरोजे प्रणवमयमरुत्कुम्भके (कुण्डले)
सूक्ष्ममार्गे
शान्ते स्वान्ते प्रलीने प्रकटितविभवे ज्योतिरूपेऽपराख्ये।
लिङ्गज्ञे ब्रह्मवाक्ये सकलतनुगतं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
९॥

नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो
नासाग्रे न्यस्तदृष्टिर्विदितभवगुणो नैव दृष्टः कदाचित्।
उन्मन्याऽवस्थया त्वां विगतकलिमलं शङ्करं न स्मरामि
क्षन्तव्यो मेऽपराधः शिव शिव शिव भो श्री महादेव शम्भो॥
१०॥

चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे
सर्पैर्भूषितकण्ठकर्णयुगले (विवरे) नेत्रोत्थवैश्वानरे।
दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे

मोक्षार्थं कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः॥ ११॥

किं वाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं

किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम्।

ज्ञात्वैतत्क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः

स्वात्मार्थं गुरुवाक्यतो भज मन श्रीपार्वतीवल्लभम्॥ १२॥

आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं

प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः।

लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं

तस्मात्त्वां (मां) शरणागतं शरणद त्वं रक्ष रक्षाधुना॥ १३॥

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं

वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।

वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं

वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम्॥ १४॥

गात्रं भस्मसितं च हसितं हस्ते कपालं सितं

खट्वाङ्गं च सितं सितश्च वृषभः कर्णे सिते कुण्डले।

गङ्गाफेनसिता जटा पशुपतेश्चन्द्रः सितो मूर्धनि

सोऽयं सर्वसितो ददातु विभवं पापक्षयं सर्वदा॥ १५॥

करचरणकृतं वाक्कायजं कर्मजं वा

श्रवणनयनजं वा मानसं वाऽपराधम्।

विहितमविहितं वा सर्वमेतत्क्षमस्व

शिव शिव करुणाब्धे श्री महादेव शम्भो॥ १६॥

॥ इति श्रीमद् शङ्कराचार्यकृत शिवापराधक्षमापण स्तोत्रं संपूर्णम्॥

ādau karmaprasaṅgātkalayati kaluṣaṁ mātṛkukṣau sthitaṁ māṁ
viṇmūtrāmedhyamadhye kathayati nitarāṁ jāṭharo jātavedāḥ ।
yadyadvai tatra duḥkhaṁ vyathayati nitarāṁ śakyate kena vaktuṁ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 1।।
bālye duḥkhātireko malalulitavapuḥ stanyapāne pipāsā
no śaktaścendriyebhyo bhavaguṇajanitāḥ jantavo māṁ tudanti ।
nānārogādiduḥkhādrudanaparavaśaḥ śaṅkaraṁ na smarāmi
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 2।।
prauḍho'haṁ yauvanastho viṣayaviṣadharaiḥ pañcabhirmarmasandhau
daṣṭo naṣṭo'vivekaḥ sutadhanayuvatisvādusaukhye niṣaṇṇaḥ ।
śaivīcintāvihīnaṁ mama hṛdayamaho mānagarvādhirūḍhaṁ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 3।।
vārdhakye cendriyāṇāṁ vigatagatimatiścādhidaivāditāpaiḥ
pāpai rogairviyogaistvanavasitavapuḥ prauḍhahīnaṁ ca dīnam ।
mithyāmohābhilāṣairbhramati mama mano dhūrjaṭerdhyānaśūnyaṁ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 4।।
no śakyaṁ smārtakarma pratipadagahanapratyavāyākulākhyaṁ
śraute vārtā kathaṁ me dvijakulavihite brahmamārge'susāre ।
jñāto dharmo vicāraiḥ śravaṇamananayoḥ kiṁ nididhyāsitavyaṁ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 5।।
snātvā pratyūṣakāle snapanavidhividhau nāhṛtaṁ gāṅgatoyaṁ
pūjārthaṁ vā kadācidbahutaragahanātkhaṇḍabilvīdalāni ।
nānītā padmamālā sarasi vikasitā gandhadhūpaiḥ tvadarthaṁ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 6।।
dugdhairmadhvājyutairdadhisitasahitaiḥ snāpitaṁ naiva liṅgaṁ
no liptaṁ candanādyaiḥ kanakaviracitaiḥ pūjitaṁ na prasūnaiḥ ।
dhūpaiḥ karpūradīpairvividharasayutairnaiva bhakṣyopahāraiḥ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 7।।

dhyātvā citte śivākhyaṁ pracurataradhanaṁ naiva dattaṁ dvijebhyo
havyaṁ te lakṣasaṅkhyairhutavahavadane nārpitaṁ bījamantraiḥ ।
no taptaṁ gāṅgātīre vratajananiyamaiḥ rudrajāpyairna vedaiḥ
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 8।।
sthitvā sthāne saroje praṇavamayamarutkumbhake (kuṇḍale) sūkṣmamārge
śānte svānte pralīne prakaṭitavibhave jyotirūpe'parākhye ।
liṅgajñe brahmavākye sakalatanugataṁ śaṅkaraṁ na smarāmi
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 9।।
nagno niḥsaṅgaśuddhastriguṇavirahito dhvastamohāndhakāro
nāsāgre nyastadṛṣṭirviditabhavaguṇo naiva dṛṣṭaḥ kadācit ।
unmanyā'vasthayā tvāṁ vigatakalimalaṁ śaṅkaraṁ na smarāmi
kṣantavyo me'parādhaḥ śiva śiva śiva bho śrī mahādeva śambho ।। 10।।
candrodbhāsitaśekhare smarahare gaṅgādhare śaṅkare
sarpairbhūṣitakaṇṭhakarṇayugale (vivare) netrotthavaiśvānare ।
dantitvakkṛtasundarāmbaradhare trailokyasāre hare
mokṣārthaṁ kuru cittavṛttimacalāmanyaistu kiṁ karmabhiḥ ।। 11।।
kiṁ vā'nena dhanena vājikaribhiḥ prāptena rājyena kiṁ
kiṁ vā putrakalatramitrapaśubhirdehena gehena kim ।
jñātvaitatkṣaṇabhaṅguraṁ sapadi re tyājyaṁ mano dūrataḥ
svātmārthaṁ guruvākyato bhaja mana śrīpārvatīvallabham ।। 12।।
āyurnaśyati paśyatāṁ pratidinaṁ yāti kṣayaṁ yauvanaṁ
pratyāyānti gatāḥ punarna divasāḥ kālo jagadbhakṣakaḥ ।
lakṣmīstoyataraṅgabhaṅgacapalā vidyuccalaṁ jīvitaṁ
tasmāttvāṁ (māṁ) śaraṇāgataṁ śaraṇada tvaṁ rakṣa rakṣādhunā ।। 13।।
vande devamumāpatiṁ suraguruṁ vande jagatkāraṇaṁ
vande pannagabhūṣaṇaṁ mṛgadharaṁ vande paśūnāṁ patim ।
vande sūryaśaśāṅkavahninayanaṁ vande mukundapriyaṁ
vande bhaktajanāśrayaṁ ca varadaṁ vande śivaṁ śaṅkaram ।।14।।
gātraṁ bhasmasitaṁ ca hasitaṁ haste kapālaṁ sitaṁ
khaṭvāṅgaṁ ca sitaṁ sitaśca vṛṣabhaḥ karṇe site kuṇḍale ।
gaṅgāphenasitā jaṭā paśupateścandraḥ sito mūrdhani
so'yaṁ sarvasito dadātu vibhavaṁ pāpakṣayaṁ sarvadā ।। 15।।
karacaraṇakṛtaṁ vākkāyajaṁ karmajaṁ vā
śravaṇanayanajaṁ vā mānasaṁ vā'parādham ।
vihitamavihitaṁ vā sarvametatkṣmasva
śiva śiva karuṇābdhe śrī mahādeva śambho ।। 16।।
।। iti śrīmad śaṅkarācāryakṛta śivāparādhakṣamāpaṇa stotraṁ saṁpūrṇam ।।

# शिवमानसपूजा
## śivamānasapūjā

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं
नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम्।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम्॥ १॥
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं
भक्श्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम्।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु॥ २॥
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलम्
वीणाभेरिमृदङ्गकाहलकला गीतं च नृत्यं तथा।
साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो॥ ३॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्शिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्॥ ४॥
करचरण कृतं वाक्कायजं कर्मजं वा।
श्रवणनयनजं वा मानसं वापराधम्।
विहितमविहितं वा सर्वमेतत्क्शमस्व।
जय जय करुणाब्धे श्रीमहादेवशम्भो॥ ५॥

ratnaiḥ kalpitamāsanaṁ himajalaiḥ snānaṁ ca divyāmbaraṁ
nānāratnavibhūṣitaṁ mṛgamadāmodāṅkitaṁ candanam ।
jātīcampakabilvapatraracitaṁ puṣpaṁ ca dhūpaṁ tathā
dīpaṁ deva dayānidhe paśupate hṛtkalpitaṁ gṛhyatām ।। 1।।
sauvarṇe navaratnakhaṇḍaracite pātre ghṛtaṁ pāyasaṁ
bhakśyaṁ pañcavidhaṁ payodadhiyutaṁ rambhāphalaṁ pānakam ।
śākānāmayutaṁ jalaṁ rucikaraṁ karpūrakhaṇḍojjvalaṁ
tāmbūlaṁ manasā mayā viracitaṁ bhaktyā prabho svīkuru ।। 2।।
chatraṁ cāmarayoryugaṁ vyajanakaṁ cādarśakaṁ nirmalam
vīṇābherimṛdaṅgakāhalakalā gītaṁ ca nṛtyaṁ tathā ।
sāṣṭāṅgaṁ praṇatiḥ stutirbahuvidhā hyetatsamastaṁ mayā
saṅkalpena samarpitaṁ tava vibho pūjāṁ gṛhāṇa prabho ।। 3।।
ātmā tvaṁ girijā matiḥ sahacarāḥ prāṇāḥ śarīraṁ gṛhaṁ
pūjā te viṣayopabhogaracanā nidrā samādhisthitiḥ ।
sañcāraḥ padayoḥ pradakśiṇavidhiḥ stotrāṇi sarvā giro
yadyatkarma karomi tattadakhilaṁ śambho tavārādhanam ।। 4।।
karacaraṇa kṛtaṁ vākkāyajaṁ karmajaṁ vā ।
śravaṇanayanajaṁ vā mānasaṁ vāparādham ।
vihitamavihitaṁ vā sarvametatkśamasva ।
jaya jaya karuṇābdhe śrīmahādevaśambho ।। 5।।

॥ इति श्रीमच्छङ्कराचार्यविरचिता शिवमानसपूजा समाप्ता॥

।। iti śrīmacchaṅkarācāryaviracitā śivamānasapūjā samāptā।।

# <u>रुद्रप्रश्नः</u>
# <u>rudrapraśnaḥ</u>

॥ अथ श्री॒ रुद्रप्रश्नः ॥

| | atha śrī` rudrapraśnaḥ | |

श्री॒ गु॒रु॒भ्यो नम॒ः। ह॒रि॒ः ओ३म्।

ॐ ग॒णाना"ं त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमं।

ज्ये॒ष्ठ॒राजं॒ ब्रह्म॑णां ब्रह्मणस्पत॒ आ नः॑ श्रृ॒ण्वन्नू॒तिभि॑स्सीद॒ साद॑नं॥

śrī` gu`ru`bhyo nama`ḥ | ha`ri`ḥ o3m|
om ga`ṇānā"ṁ tvā ga`ṇapatiṁ havāmahe ka`viṁ kavī`nāmupa`maśravastamaṁ|
jye`ṣṭha`rājaṁ` brahmaṇāṁ brahmaṇaspata` ā naḥ śrṛ`ṇvannū`tibhissīda` sādanaṁ | |

॥ ॐ श्री महागणपतये नमः ॥

| | om śrī mahāgaṇapataye namaḥ | |

॥ ॐ नमो भगवते॑ रुद्रा॒य ॥

| | om namo bhagavate rudrā`ya | |

ॐ नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑ः।

नम॑स्ते अस्तु॒ धन्व॑ने बा॒हुभ्या॑मु॒त ते॒ नम॑ः॥

om namaste rudra ma`nyava u`tota` iṣave` namaḥ|
namaste astu` dhanvane bā`hubhyāmu`ta te` namaḥ| |

या त॒ इषु॑ः शि॒वत॑मा शि॒वम् ब॒भूव॑ ते॒ धनु॑ः।

शि॒वा श॑र॒व्या॑ या तव॒ तया॑ नो रुद्र मृडय॥

yā ta` iṣuḥ śi`vatamā śi`vam ba`bhūva te` dhanuḥ|
śi`vā śara`vyā yā tava` tayā no rudra mṛḍaya| |

या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी।

तया॑ नस्त॒नुवा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि॥

yā te rudra śi`vā ta`nūragho`rā'pāpakāśinī |
tayā nasta`nuvā` śantamayā` giriśantā`bhicākaśīhi| |

यामिषु॑ं गिरिशंत॒ हस्ते॒ बिभ॒र्ष्यस्त॑वे।

शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हि॒ꣳसी॒ः पुरु॑षं॒ जग॑त्॥

yāmiṣuṁ giriśaṁta` haste` bibha`rṣyastave ।
śi`vāṁ giritra` tāṁ kuru` mā hiṁ̐sī`ḥ puruṣaṁ` jagat ।।

शि`वेन` वचसा त्वा` गिरि`शाच्छावदामसि।

यथा न`ः सर्व`मिज्जगदय`क्ष्मꣳ सु`मना` असत्॥

śi`vena` vacasā tvā` giri`śācchāvadāmasi ।
yathā na`ḥ sarva`mijjagadaya`kṣmaṁ̐ su`manā` asat ।।

अध्यवोचदधिव`क्ता प्रथ`मो दैव्यो भि`षक्।

अहीꣳश्च सर्वा"ञ्ज`म्भय`न्त्सर्वा"श्च यातुधा`न्यः॥

adhyavocadadhiva`ktā pratha`mo daivyo bhi`ṣak ।
ahīṁ̐śca sarvā"ñja`mbhaya`ntsarvā"śca yātudhā`nyaḥ ।।

अ`सौ यस्ता`म्रो अरु`ण उ`त ब`भ्रुः सुम`ङ्गलः।

ये चे`माꣳ रु`द्रा अ`भितो दि`क्षु श्रि`ताः सहस्र`शोऽवैषा`ꣳ` हेड ईमहे॥

a`sau yastā`mro aru`ṇa u`ta ba`bhruḥ suma`ṅgalaḥ ।
ye ce`māṁ̐ ru`drā a`bhito di`kṣu śri`tāḥ sahasra`śo'vaiṣā`ṁ̐` heḍa īmahe ।।

अ`सौ योऽव`सर्पति` नीलग्रीवो` विलोहितः।

उ`तैनं गो`पा अदृश`न्न`दृशन्नुदहा`र्यः॥

a`sau yo'va`sarpati` nīlagrīvo` vilohitaḥ ।
u`tainaṁ go`pā adṛśa`nna`dṛśannudahā`ryaḥ ।।

उ`तैनं` विश्वा भू`तानि` स दृ`ष्टो मृडयाति नः।

नमो अस्तु` नीलग्रीवाय सहस्रा`क्षाय मीढुषे"॥

u`tainaṁ` viśvā bhū`tāni` sa dṛ`ṣṭo mṛḍayāti naḥ ।
namo astu` nīlagrīvāya sahasrā`kṣāya mīḍhuṣe" ।।

अथो` ये अस्य` सत्वानो`ऽहं तेभ्योऽकर`न् नमः।

प्रमुञ्च` धन्वन`स्त्व-मु`भयो`रार्त्नियो`र्ज्याम्॥

atho` ye asya` satvāno`'haṁ tebhyo'kara`n namaḥ ।
pramuñca` dhanvana`stva-mu`bhayo`rārtniyo`rjyām ।।

याश्च ते` हस्त` इषव`ः परा` ता भगवो वप।

अ`व`तत्य` धनु`स्तवꣳ सहस्राक्ष` शतेषुधे॥

yāśca te` hasta` iṣava`ḥ parā` tā bhagavo vapa ।
a`va`tatya` dhanu`stavaṁ̐ sahasrākṣa` śateṣudhe ।।

नि॒शीर्य॑ श॒ल्याना॒ं मुखा॑ शि॒वो नः॑ सु॒मना॑ भव।

विज्यं॒ धनुः॑ कप॒र्दिनो॒ विश॑ल्यो॒ बाण॑वाꣳ उ॒त॥

ni`śīrya śa`lyānā`ṁ mukhā śi`vo naḥ su`manā bhava ।
vijyaṁ` dhanuḥ kapa`rdino` viśalyo` bāṇavāṁ u`ta ।।

अने॑शन्न॒स्येष॑व आ॒भुर॑स्य निष॒ङ्गथिः॑।

या ते॑ हे॒तिर्मी॑ढुष्टम॒ हस्ते॑ ब॒भूव॑ ते॒ धनुः॑॥

aneśanna`syeṣava ā`bhurasya niṣa`ṅgathiḥ ।
yā te he`tirmīḍhuṣṭama` haste ba`bhūva te` dhanuḥ ।।

तया॒ऽस्मान् वि॒श्वत॒स्त्वम॑य॒क्ष्मया॒ परि॑ब्भुज।

नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे"॥

tayā`'smān vi`śvata`stvamaya`kṣmayā` paribbhuja ।
namaste a`stvāyudhā`yānātatāya dhṛ`ṣṇave" ।।

उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॒म् तव॒ धन्व॑ने।

परि॑ ते॒ धन्व॑नो हे॒तिर॒स्मान्वृ॑णक्तु वि॒श्वतः॑॥

u`bhābhyāmu`ta te` namo bā`hubhyā`m tava` dhanvane ।
pari te` dhanvano he`tira`smānvṛṇaktu vi`śvataḥ ।।

अथो॒ य इ॑षु॒धिस्तवा॒रे अ॒स्मन्निधे॑हि॒ तम्।

atho` ya iṣu`dhistavā`re a`smannidhehi` tam ।

नम॑स्ते अस्तु भगवन्विश्वेश्व॒राय॑ महादे॒वाय॑ त्र्यम्ब॒काय॑

त्रिपुरान्त॒काय॑ त्रिकाग्निका॒लाय॑ कालाग्निरु॒द्राय॑

नीलक॒ण्ठाय॑ मृत्युंज॒याय॑ सर्वेश्व॒राय॑

सदाशि॒वाय॑ श्रीमन्महादे॒वाय॒ नमः॑॥१॥

namaste astu bhagavanviśveśva`rāya mahāde`vāya tryamba`kāya
tripurānta`kāya trikāgnikā`lāya kālāgniru`drāya
nīlaka`ṇṭhāya mṛtyuṁja`yāya sarveśva`rāya
sadāśi`vāya śrīmanmahāde`vāya` namaḥ ।।1।।

नमो॒ हिर॑ण्यबाहवे सेना॒न्ये॑ दि॒शां च॒ पत॑ये॒ नमो॒

नमो॑ वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः पशू॒नां पत॑ये॒ नमो॒

नमः॑ स॒स्पिञ्ज॑राय॒ त्विषी॑मते पथी॒नां पत॑ये॒ नमो॒

नमो॑ बभ्लु॒शाय॑ विव्या॒धिनेऽन्ना॑ना॒ं पत॑ये नमो॒

नमो` हरि॑केशायोपवी`तिने॑ पु`ष्टाण`ं पत॑ये नमो`

नमो॑ भ`वस्य॑ हे`त्यै जग॑ता`ं पत॑ये` नमो`

नमो॑ रु`द्राया॑तता`विने` क्षेत्रा॑णा`ं पत॑ये` नमो`

नमस्सू`तायाह॑न्त्याय` वना॑ना`ं पत॑ये` नमो`

नमो` रोहि॑ताय स्थ`पत॑ये वृ`क्षाण`ं पत॑ये` नमो`

नमो॑ म`न्त्रिणे॑ वाणि`जाय` कक्षा॑ण`ं पत॑ये नमो`

नमो॑ भुव`ंतये॑ वारिवस्कृ`धायौष॑धीना`ं पत॑ये` नमो`

नम॑ उ`च्चैर्घो॑षायाक्र`न्दय॑ते पत्ती`नाम् पत॑ये` नमो`

नम॑ः कृत्स्नवी`ताय` धाव॑ते` सत्व॑ना`ं पत॑ये` नम॑ः॥२॥

namo` hiraṇyabāhave senā`nye di`śāṁ ca` pataye` namo`
namo vṛ`kṣebhyo` harikeśebhyaḥ paśū`nāṁ pataye` namo`
namaḥ sa`spiñjarāya` tviṣīmate pathī`nāṁ pataye` namo`
namo babhlu`śāya vivyā`dhine'nnānā`ṁ pataye namo`
namo` harikeśāyopavī`tine pu`ṣṭāṇa`ṁ pataye namo`
namo bha`vasya he`tyai jagatā`ṁ pataye` namo`
namo ru`drāyātatā`vine` kṣetrāṇā`ṁ pataye` namo`
namassū`tāyāhantyāya` vanānā`ṁ  pataye` namo`
namo` rohitāya stha`pataye vṛ`kṣāṇa`ṁ pataye` namo`
namo ma`ntriṇe vāṇi`jāya` kakṣāṇa`ṁ pataye namo`
namo bhuva`ṁtaye vārivaskṛ`dhāyauṣadhīnā`ṁ pataye` namo`
nama u`ccairghoṣāyākra`ndayate pattī`nām pataye` namo`
namaḥ kṛtsnavī`tāya` dhāvate` satvanā`ṁ pataye` namaḥ ||2||

नम`ः सह॑मानाय निव्या`दिन॑ आव्या`धिनी॑ना`ं पत॑ये` नमो`

नम॑ः ककु`भाय॑ निष`ङ्गिणे" स्ते`नाना`ं पत॑ये` नमो`

नमो॑ निष`ङ्गिण॑ इषुधि`मते` तस्क॑राणा`ं पत॑ये` नमो`

नमो` वञ्च॑ते परि`वञ्च॑ते स्तायू`नां पत॑ये` नमो`

नमो॑ निचे`रवे॑ परिच`राया॑रण्याना`ं पत॑ये` नमो`

नम॑ः सृका`विभ्यो` जिघा॑ꣳसद्भ्यो मुष्ण`तां पत॑ये` नमो`

नमो॑ऽसि`मद्भ्यो` नक्त`ंचर॑द्भ्यः प्रकृ`न्ताना`ं पत॑ये` नमो`

नम॑ उष्णी`षिने॑ गिरिच`राय॑ कुलु`ञ्चाना`ं पत॑ये` नमो`

नम` इषु॑मद्भ्यो धन्वा`विभ्य॑श्च वो` नमो`

नम॑ आतन्वा`नेभ्य॑ प्रति`दधा॑नेभ्यश्च वो` नमो`

नम॑ आ`यच्छ॑द्भ्यो विसृ`जद्भ्य॑श्च वो` नमो`

नमोऽस्य॑द्भ्यो॑ विध्य॑द्भ्यश्च वो॒ नमो॒

नम॒ आसी॑नेभ्य॒ः शया॑नेभ्यश्च वो॒ नमो॒

नम॑ः स्व॒पद्भ्यो॒ जाग्र॑द्भ्यश्च वो॒ नमो॒

नम॒स्तिष्ठ॑द्भ्यो॒ धाव॑द्भ्यश्च वो॒ नमो॒

नम॑ः स॒भाभ्य॑ः स॒भाप॑तिभ्यश्च वो॒ नमो॒

नमो॒ अश्वे॒भ्योऽश्व॑पतिभ्यश्च वो॒ नम॑ः ॥३॥

nama`ḥ sahamānāya nivyā`dina āvyā`dhinīnā`ṁ pataye` namo`
namaḥ kaku`bhāya niṣa`ṅgiṇe" ste`nānā`ṁ pataye` namo`
namo niṣa`ṅgiṇa iṣudhi`mate` taskarāṇā`ṁ pataye` namo`
namo` vañcate pari`vañcate stāyū`nāṁ pataye` namo`
namo nice`rave parica`rāyāraṇyānā`ṁ pataye` namo`
namaḥ sṛkā`vibhyo` jighāṁsadbhyo muṣṇa`tāṁ pataye` namo`
namo'si`madbhyo` nakta`ṁcaradbhyaḥ prakṛ`ntānā`ṁ pataye` namo`
nama uṣṇī`ṣine girica`rāya kulu`ñcānā`ṁ pataye` namo`
nama` iṣumadbhyo dhanvā`vibhyaśca vo` namo`
nama ātanvā`nebhya prati`dadhānebhyaśca vo` namo`
nama ā`yacchadbhyo visṛ`jadbhyaśca vo` namo`
namo'syadbhyo` vidhyadbhyaśca vo` namo`
nama` āsīnebhya`ḥ śayānebhyaśca vo` namo`
namaḥ sva`padbhyo` jāgradbhyaśca vo` namo`
nama`stiṣṭhadbhyo` dhāvadbhyaśca vo` namo`
namaḥ sa`bhābhyaḥ sa`bhāpatibhyaśca vo` namo`
namo` aśve`bhyo'śvapatibhyaśca vo` namaḥ ||3||

नम॑ आव्य॒धिनी"भ्यो वि॒विध्य॑न्तीभ्यश्च वो॒ नमो॒

नम॒ उग॑णाभ्यस्तृꣳह॒तीभ्य॑श्च वो॒ नमो॒

नमो॑ गृ॒त्सेभ्यो॑ गृ॒त्सप॑तिभ्यश्च वो॒ नमो॒

नमो॒ व्राते"भ्यो॒ व्रात॑पतिभ्यश्च वो॒ नमो॒

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒

नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒

नमो॑ म॒हद्भ्य॑ः क्षुल्ल॒केभ्य॑श्च वो॒ नमो॒

नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒

नमो॒ रथे"भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒

नम॒ः सेना"भ्यः सेन॒निभ्य॑श्च वो॒ नमो॒

नम॑ः क्ष॒त्तृभ्य॑ः संग्रही॒तृभ्य॑श्च वो॒ नमो॒

नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒

नम॑ः कुला॒लेभ्यः क॒र्मारे॑भ्यश्च वो॒ नमो॒

नम॑ः पुञ्जिष्टे॑भ्यो निषा॒देभ्य॑श्च वो॒ नमो॒

नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒

नमो॑ मृग॒युभ्य॑ः श्व॒निभ्य॑श्च वो॒ नमो॒

नम॑ः श्वभ्य॒ः श्वप॑तिभ्यश्च वो॒ नम॑ः ॥४॥

nama āvya`dhinī"bhyo vi`vidhyantībhyaśca vo` namo`
nama` ugaṇābhyastṛṁha`tībhyaśca vo` namo`
namo gṛ`tsebhyo gṛ`tsapatibhyaśca vo` namo`
namo` vrāte"bhyo` vrātapatibhyaśca vo` namo`
namo ga`ṇebhyo ga`ṇapatibhyaśca vo` namo`
namo` virūpebhyo vi`śvarupebhyaśca vo` namo`
namo ma`hadbhyaḥ kṣulla`kebhyaśca vo` namo`
namo ra`thibhyo ra`thebhyaśca vo` namo`
namo` rathe"bhyo` rathapatibhyaśca vo` namo`
nama`ḥ senā"bhyaḥ sena`nibhyaśca vo` namo`
namaḥ kṣa`ttṛbhyaḥ saṁgrahī`tṛbhyaśca vo` namo`
nama`stakṣabhyo rathakā`rebhyaśca vo` namo`
nama`ḥ kulālebhyaḥ ka`rmāre"bhyaśca vo` namo`
namaḥ puñjiṣṭe"bhyo niṣā`debhyaśca vo` namo`
nama iṣu`kṛdbhyo dhanva`kṛdbhyaśca vo` namo`
namo mṛga`yubhyaḥ śva`nibhyaśca vo` namo`
nama`ḥ śvabhya`ḥ śvapatibhyaśca vo` namaḥ ||4||

नमो॑ भ॒वाय॑ च रु॒द्राय॑ च॒

नम॑ः श॒र्वाय॑ च पशु॒पत॑ये च॒

नमो॒ नील॑ग्रीवाय च शिति॒कण्ठा॑य च॒

नम॑ः कप॒र्दिने॑ च॒ व्यु॑प्तकेशाय च॒

नम॑ः सहस्रा॒क्षाय॑ च श॒तध॑न्वने च॒

नमो॑ गिरि॒शाय॑ च शिपिवि॒ष्टाय॑ च॒

नमो॑ मी॒ढुष्ट॑माय॒ चेषु॑मते च॒

नमो᳚ ह्र॒स्वाय॑ च वाम॒नाय॑ च॒

नमो॑ बृह॒ते च॒ वर्षी॑यसे च॒

नमो॑ वृ॒द्धाय॑ च सं॒वृद्ध॑ने च॒

नमो॒ अग्रि॑याय च प्रथ॒माय॑ च॒

नम॑ आ॒शवे॑ चाजि॒राय॑ च॒

नम॑ः शीघ्रि॑याय च॒ शीभ्या॑य च॒

नम॑ ऊ॒र्म्या॑य चावस्व॒न्या॑य च॒

नम॑ः स्रोत॒स्या॑य च॒ द्वीप्या॑य च॥५॥

namo bha`vāya ca ru`drāya ca`
namaḥ śa`rvāya ca paśu`pataye ca`
namo` nīlagrīvāya ca śiti`kaṇṭhāya ca`
namaḥ kapa`rdine ca` vyuptakeśāya ca`
namaḥ sahasrā`kṣāya ca śa`tadhanvane ca`
namo giri`śāya ca śipivi`ṣṭāya ca`
namo mī`ḍhuṣṭamāya` ceṣumate ca`
namo" hra`svāya ca vāma`nāya ca`
namo bṛha`te ca` varṣīyase ca`
namo vṛ`ddhāya ca saṁ`vṛdvane ca`
namo` agriyāya ca pratha`māya ca`
nama ā`śave cāji`rāya ca`
nama`ḥ śīghriyāya ca` śībhyāya ca`
nama ū`rmyāya cāvasva`nyāya ca`
namaḥ srota`syāya ca` dvīpyāya ca ||5||

नमो" ज्ये॒ष्ठाय॑ च कनि॒ष्ठाय॑ च॒

नम॑ः पूर्व॒जाय॑ चापर॒जाय॑ च॒

नमो॑ मध्य॒माय॑ चापग॒ल्भाय॑ च॒

नमो॑ जघ॒न्या॑य च॒ बुध्नि॑याय च॒

नम॑ः सो॒भ्या॑य च प्रतिस॒र्या॑य च॒

नमो॒ याम्या॑य च॒ क्षेम्या॑य च॒

नम॑ उर्व॒र्या॑य च॒ खल्या॑य च॒

नम॒ः श्लोक्या॑य चाऽवसा॒न्या॑य च॒

नमो॒ वन्या॑य च॒ कक्ष्या॑य च॒

नम॑ः श्र॒वाय॑ च प्रतिश्र॒वाय॑ च॒

नम॑ आ॒शुषे॑णाय चा॒शुर॑थाय च॒

नम॒ः शूरा॑य चावभिन्द॒ते च॒

नमो॑ व॒र्मिणे॑ च वरू॒थिने॑ च॒

नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒

नम॑ः श्रु॒ताय॑ च श्रुतसे॒नाय॑ च॥ ६॥

namo" jye`ṣṭhāya ca kani`ṣṭhāya ca`
namaḥ pūrva`jāya cāpara`jāya ca`
namo madhya`māya cāpaga`lbhāya ca`
namo jagha`nyāya ca` budhniyāya ca`

namaḥ so`bhyāya ca pratisa`ryāya ca`
namo` yāmyāya ca` kṣemyāya ca`
nama urva`ryāya ca` khalyāya ca`
nama`ḥ ślokyāya cā'vasā`nyāya ca`
namo` vanyāya ca` kakṣyāya ca`
namaḥ śra`vāya ca pratiśra`vāya ca`
nama ā`śuṣeṇāya cā`śurathāya ca`
nama`ḥ śūrāya cāvabhinda`te ca`
namo va`rmiṇe ca varū`thine ca`
namo bi`lmine ca kava`cine ca`
namaḥ śru`tāya ca śrutase`nāya ca ।। 6।।

नमो दुन्दु`भ्याय चाहन`न्याय च` नमो धृ`ष्णवे च प्रमृ`शाय च`

नमो दू`ताय च` प्रहिताय च` नमो निष`ङ्गिणे चेषुधि`मते च`

नमस्ती`क्ष्णेषवे चायु`धिने च` नमः स्वायु`धाय च सु`धन्वने च`

नम`ः स्रुत्याय च` पथ्याय च` नमः का`ट्याय च नी`प्याय च`

नम`ः सूद्याय च सर`स्याय च` नमो ना`द्याय च वैश`न्ताय च`

नम`ः कूप्याय चाव`ट्याय च` नमो` वर्ष्याय चाव`र्ष्याय च`

नमो मे`घ्याय च विद्यु`त्याय च` नम ई`ध्रियाय चात`प्याय च`

नमो` वात्याय च` रेष्मियाय च` नमो वास्त`व्याय च वास्तु`पाय च॥ ७॥
namo dundu`bhyāya cāhana`nyāya ca` namo dhṛ`ṣṇave ca pramṛ`śāya ca`
namo dū`tāya ca` prahitāya ca` namo niṣa`ṅgiṇe ceṣudhi`mate ca`
namastī`kṣṇeṣave cāyu`dhine ca` namaḥ svāyu`dhāya ca su`dhanvane ca`
nama`ḥ srutyāya ca` pathyāya ca` namaḥ kā`ṭyāya ca nī`pyāya ca`
nama`ḥ sūdyāya ca sara`syāya ca` namo nā`dyāya ca vaiśa`ntāya ca`
nama`ḥ kūpyāya cāva`ṭyāya ca` namo` varṣyāya cāva`rṣyāya ca`
namo me`ghyāya ca vidyu`tyāya ca` nama ī`dhriyāya cāta`pyāya ca`
namo` vātyāya ca` reṣmiyāya ca` namo vāsta`vyāya ca vāstu`pāya ca ।। 7।।

नम`ः सोमाय च रु`द्राय च` नमस्ता`म्राय चारु`णाय च`

नमः श`ङ्गाय च पशु`पतये च` नम उ`ग्राय च भी`माय च`

नमो अग्रेव`धाय च दूरेव`धाय च`

नमो ह`न्त्रे च` हनीयसे च` नमो वृ`क्षेभ्यो` हरिकेशेभ्यो`

नमस्ता`राय` नमश्श`ंभवे च मयो`भवे च`

नमः शंक`राय च मयस्क`राय च`

नमः शि`वाय च शि`वतराय च`

नम`स्तीर्थ्याय च` कूल्याय च`

नम॑ः पा॒र्या॑य चावा॒र्या॑य च॒
नम॑ः प्र॒तर॑णाय चो॒त्तर॑णाय च॒
नम॑ आता॒र्या॑य चाला॒द्या॑य च॒
नम॒ः शष्प्या॑य च॒ फेन्या॑य च॒
नम॑ः सिक॒त्या॑य च प्रवा॒ह्या॑य च॥ ८॥

nama̍`ḥ somā̍ya ca ru`drā̍ya ca` nama̍stā`mrā̍ya cā̍ru`ṇā̍ya ca`
nama̍ḥ śa`ṅgāya ca paśu`pata̍ye ca` nama u`grā̍ya ca bhī`mā̍ya ca`
namo̍ agreva`dhāya ca dūreva`dhā̍ya ca`
namo̍ ha`ntre ca` hanī̍yase ca` namo̍ vṛ`kṣebhyo̍` hari̍keśebhyo`
nama̍stā`rāya` nama̍śśa`ṁbhave ca mayo`bhave ca`
nama̍ḥ śaṁka`rā̍ya ca mayaska`rā̍ya ca`
nama̍ḥ śi`vā̍ya ca śi`vatarā̍ya ca`
nama̍`stīrthyā̍ya ca` kūlyā̍ya ca`
nama̍ḥ pā`ryā̍ya cāvā`ryā̍ya ca`
nama̍ḥ pra`tara̍ṇāya co`ttara̍ṇāya ca`
nama̍ ātā`ryā̍ya cālā`dyā̍ya ca`
nama̍`ḥ śaṣpyā̍ya ca` phenyā̍ya ca`
nama̍ḥ sika`tyā̍ya ca pravā`hyā̍ya ca ||8||

नम॑ इरि॒ण्या॑य च प्रप॒थ्या॑य च॒
नम॑ः किꣳशि॒लाय च॒ क्षय॑णाय च॒
नम॑ः कप॒र्दिने॑ च पुल॒स्तये॑ च॒
नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒
नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒
नम॑ः का॒ट्या॑य च गह्व॒रे॒ष्ठाय॑ च॒
नमो" ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒
नम॑ः पाꣳस॒व्या॑य च रज॒स्या॑य च॒
नम॒ः शुष्क्या॑य च हरि॒त्या॑य च॒
नमो॒ लोप्या॑य चोल॒प्या॑य च॒
नम॑ ऊ॒र्व्या॑य च सू॒र्म्या॑य च॒
नम॑ः प॒र्ण्या॑य च पर्णश॒द्या॑य च॒
नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒
नम॑ आख्खिद॒ते च॑ प्रख्खिद॒ते च॒
नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ॒ हृद॑येभ्यो॒

नमो॑ विक्षीण॒केभ्यो॒ नमो॑ विचिन्व॒त्केभ्यो॒

नम॑ आनिर्ह॒तेभ्यो॒ नम॑ आमीव॒त्केभ्यः॑॥ ९॥

nama iri`ṇyāya ca prapa`thyāya ca`
namaḥ kiṁśi`lāya ca` kṣayaṇāya ca`
namaḥ kapa`rdine ca pula`staye ca`
namo` goṣṭhyāya ca` gṛhyāya ca`
nama`stalpyāya ca` gehyāya ca`
namaḥ kā`ṭyāya ca gahvare`ṣṭhāya ca`
namo" hrada`yyāya ca nive`ṣpyāya ca`
namaḥ pāṁsa`vyāya ca raja`syāya ca`
nama`ḥ śuṣkyāya ca hari`tyāya ca`
namo` lopyāya cola`pyāya ca`
nama ū`rvyāya ca sū`rmyāya ca`
namaḥ pa`rṇyāya ca parṇaśa`dyāya ca`
namo'pagu`ramāṇāya cābhighna`te ca`
nama ākhkhida`te ca prakhkhida`te ca`
namo vaḥ kiri`kebhyo de`vānā`ṁ` hṛdayebhyo`
namo vikṣīṇa`kebhyo` namo vicinva`tkebhyo`
nama ānirha`tebhyo` nama āmīva`tkebhyaḥ ।। 9।।

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित।

ए॒षां पुरु॑षाणामे॒षां प॑शू॒नां मा भेर्माऽरो॒ मो ए॑षा॒ं

किंच॒नाम॑मत्॥ १०-१॥

drāpe` andhasaspate` daridra`nnīlalohita ।
e`ṣāṁ puruṣāṇāme`ṣāṁ paśū`nāṁ mā bhermā'ro` mo eṣā`ṁ
kiṁca`nāmamat ।। 10-1।।

या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑ भेषजी।

शि॒वा रु॒द्रस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे"॥ १०-२॥

yā te rudra śi`vā ta`nūḥ śi`vā vi`śvāha bheṣajī ।
śi`vā ru`drasya bheṣa`jī tayā no mṛḍa jī`vase" ।। 10-2।।

इ॒माꣳ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने" क्ष॒यद्वी॑राय॒ प्रभ॑रामहे म॒तिम्॥

यथा॑ न॒ः शमस॑द्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑

अ॒स्मिन्ननातु॑रम्॥ १०-३॥

i`māṁ ru`drāya ta`vase kapa`rdine" kṣa`yadvīrāya` prabharāmahe ma`tim।।
yathā na`ḥ śamasaddvi`pade` catuṣpade` viśvaṁ pu`ṣṭaṁ grāme
a`sminnanāturam ।। 10-3।।

मृ॒डा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते।

यच्छं च` योश्च` मनुराय`जे पि`ता तदश्याम` तव रुद्र` प्रणीतौ॥ १०-४॥
mṛ`ḍā no rudro`ta no` mayaskṛdhi kṣa`yadvīrāya` namasā vidhema te ।
yaccham ca` yośca` manurāya`je pi`tā tadaśyāma` tava rudra` praṇītau ।। 10-4।।

मा नो म`हान्तमु`त मा नो अर्भ`कं
मा न` उक्षन्त-मु`त मा न उक्षि`तम्।
मा नोऽवधीः पि`तरं` मोत मा`तरं प्रि`या मा
नस्त`नुवो रुद्र रीरिषः॥ १०-५॥
mā no ma`hāntamu`ta mā no arbha`kaṁ
mā na` ukṣanta-mu`ta mā na ukṣi`taṁ ।
mā no'vadhīḥ pi`taraṁ` mota mā`taraṁ pri`yā mā
nasta`nuvo rudra rīriṣaḥ ।। 10-5।।

मानस्तो`के तनये` मा न` आयुषि` मा नो` गोषु`
मा नो` अश्वेषु रीरिषः।
वी`रान्मा नो रुद्र भामि`तोऽवधी-र्ह`विष्मन्तो`
नमसा विधेम ते॥ १०-६॥
mānasto`ke tanaye` mā na` āyuṣi` mā no` goṣu`
mā no` aśveṣu rīriṣaḥ ।
vī`rāṇmā no rudra bhāmi`to'vadhī-rha`viṣmanto`
namasā vidhema te ।। 10-6।।

आ`रात्ते गो`घ्न उ`त पूरुष`घ्ने क्ष`यद्वीराय
सु`म्नम`स्मे ते अस्तु।
रक्षा च नो` अधि च देव ब्रू`ह्यधा च नः`
शर्म यच्छ द्वि`बर्हा"ः॥ १०-७॥
ā`rātte go`ghna u`ta pūruṣa`ghne kṣa`yadvīrāya
su`mnama`sme te astu ।
rakṣā ca no` adhi ca deva brū`hyadhā ca naḥ`
śarma yaccha dvi`barhā"ḥ ।। 10-7।।

स्तु`हि श्रु`तं गर्त`सद`ं युवानं मृ`गन्न भी`म-मुपह`त्नुमु`ग्रम्।
मृ`डा जरि`त्रे रुद्र` स्तवानो अ`न्यन्ते
अ`स्मन्निवपन्तु` सेना"ः॥ १०-८॥
stu`hi śru`taṁ garta`sada`ṁ yuvānaṁ mṛ`ganna bhī`ma-mupaha`tnumu`gram ।
mṛ`ḍā jari`tre rudra` stavāno a`nyante
a`smannivapantu` senā"ḥ ।। 10-8।।

परिणो रु`द्रस्य हे`तिर्वृणक्तु` परि त्वे`षस्य दुर्म`तिरघा`योः।

अव स्थि`रा म`घवद्भ्यस्तनुष्व` मीढ्वस्तो`काय`

तनयाय मृडय॥ १०-९॥

pariṇo ru`drasya he`tirvṛṇaktu` pari tve`ṣasya durma`tiraghā`yoḥ ।
ava sthi`rā ma`ghavadbhyastanuṣva` mīḍhvasto`kāya`
tanayāya mṛuḍaya ।। 10-9।।

मीढुष्टम` शिवतम शि`वो नः सु`मना भव।

प`र`मे वृ`क्ष आयुधन्नि`धाय` कृत्ति`ं वसान`

आचर` पिनाक`ं बिभ्र`दागहि॥ १०-१०॥

mīḍhuṣṭama` śivatama śi`vo naḥ su`manā bhava ।
pa`ra`me vṛ`kṣa āyudhanni`dhāya` kṛtti`ṁ vasāna`
ācara` pināka`ṁ bibhra`dāgahi ।। 10-10।।

विकिरिद` विलोहित` नमस्ते अस्तु भगवः।

यास्ते स`हस्रꣳ हे`तयो`न्यम`स्मन्निवपन्तु` ताः॥ १०-११॥

vikirida` vilohita` namaste astu bhagavaḥ ।
yāste sa`hasraꣳ he`tayo`nyama`smannivapantu` tāḥ ।। 10-11।।

स`हस्राणि सहस्र`धा बाहु`वोस्तव हे`तयः।

तासा`मीशानो भगवः परा`चीना` मुखा कृधि॥ १०-१२॥

sa`hasrāṇi sahasra`dhā bāhu`vostava he`tayaḥ ।
tāsā`mīśāno bhagavaḥ parā`cīnā` mukhā kṛdhi ।। 10-12।।

स`हस्राणि सहस्र`शो ये रु`द्रा अधि` भूम्या"म्।

तेषाꣳ सहस्रयोज`नेऽव`धन्वानि तन्मसि॥ ११-१॥

sa`hasrāṇi sahasra`śo ye ru`drā adhi` bhūmyā"m ।
teṣāꣳ sahasrayoja`ne'va`dhanvāni tanmasi ।। 11-1।।

अ`स्मिन् मह`त्यर्ण`वे"ऽन्तरिक्षे भ`वा अधि॥ ११-२॥

नीलग्रीवाः शिति`कण्ठा"ः श`र्वा अ`धः क्षमाच`राः॥ ११-३॥

नीलग्रीवाः शिति`कण्ठा` दिवꣳ रु`द्रा उपश्रिताः॥ ११-४॥

ये वृ`क्षेषु स`स्पिंजरा` नीलग्रीवा` विलोहिताः॥ ११-५॥

ये भू`ताना`मधिपतयो विशि`खासः कप`र्दिनः॥ ११-६॥

ये अन्नेषु वि`विध्यन्ति` पात्रेषु` पिबतो` जनान्॥ ११-७॥

ये प॒थां प॑थि॒रक्ष॑य ऐलबृ॒दा य॒व्युध॑ः॥ ११-८॥

ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒कावन्तो निष॒ङ्गिण॑ः॥ ११-९॥

य ए॒ताव॑न्तश्च॒ भूया॑ꣳसश्च॒ दिशो॑ रु॒द्रा वि॑तस्थि॒रे

तेषा॑ꣳ सहस्र-योज॒नेऽव॒धन्वा॑नि तन्मसि॥ ११-१०॥

नमो॑ रु॒द्रेभ्यो॒ ये पृ॑थि॒व्यां ये"ऽन्तरि॑क्षे॒

ये दि॒वि येषा॒मन्न॒ं वातो॑ व॒र्षमिष॑व॒स्तेभ्यो॒ दश॒

प्राची॒र्दश॑ दक्षि॒णा दश॑ प्र॒तीची॒र्दशोदी॑चीर्दशो॒र्ध्वास्तेभ्यो॒

नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒

तं वो॒ जम्भे॑ दधामि॥ ११-११॥

a`smin ma'ha`tyar'ṇa`ve"'ntari'kṣe bha`vā adhi' | | 11-2 | |
nīla'grīvāḥ śiti`kaṇṭhā"ḥ śa`rvā a`dhaḥ kṣa'māca`rāḥ | | 11-3 | |
nīla'grīvāḥ śiti`kaṇṭhā` divam̐ ru`drā upa'śritāḥ | | 11-4 | |
ye vṛ`kṣeṣu' sa`spim̐jarā` nīla'grīvā` vilo'hitāḥ | | 11-5 | |
ye bhū`tānā`madhi'patayo viśi`khāsa'ḥ kapa`rdina'ḥ | | 11-6 | |
ye anneṣu vi`vidhyanti` pātreṣu` pibato` janān | | 11-7 | |
ye pa`thāṁ pa'thi`rakṣa'ya ailabṛ`dā ya`vyudha'ḥ | | 11-8 | |
ye tī`rthāni' pra`cara'nti sṛ`kāvanto niṣa`ṅgiṇaḥ | | 11-9 | |
ya e`tāva'ntaśca` bhūyām̐'saśca` diśo' ru`drā vi'tasthi`re
teṣām̐' sahasra-yoja`ne'va`dhanvā'ni tanmasi | | 11-10 | |
namo' ru`drebhyo` ye pṛ'thi`vyāṁ ye"'ntari'kṣe`
ye di`vi yeṣā`manna`ṁ vāto' va`rṣamiṣa'va`stebhyo` daśa`
prācī`rdaśa' dakṣi`ṇā daśa' pra`tīcī`rdaśodī'cīrdaśo`rdhvāstebhyo`
nama`ste no' mṛḍayantu` te yaṁ dvi`ṣmo yaśca' no` dveṣṭi`
taṁ vo` jambhe' dadhāmi | | 11-11 | |

त्र्यं॑बकं यजामहे सुग॒न्धिं पु॑ष्टि॒वर्ध॑नम्।

उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्यो-र्मु॑क्षीय॒ माऽमृता"त्॥ १॥

tryam'bakaṁ yajāmahe suga`ndhiṁ pu'ṣṭi`vardha'nam |
u`rvā`ru`kami'va` bandha'nānmṛ`tyo-rmu'kṣīya` mā'mṛtā"t | | 1 | |

यो रु॒द्रो अ॒ग्नौ यो अ॒प्सु य ओष॑धीषु॒

यो रु॒द्रो विश्वा॒ भुव॑नाऽऽवि॒वेश॒

तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु॥ २॥

yo ru`dro a`gnau yo a`psu ya oṣa'dhīṣu`
yo ru`dro viśvā` bhuva'nā"vi`veśa`
tasmai' ru`drāya` namo' astu | | 2 | |

तमु॑ष्टु॒हि॒ यः स्वि॒षुः सु॒धन्वा॒ यो विश्व॑स्य॒ क्षय॑ति भेष॒जस्य॑।

यक्ष्वा"म`हे सौ"मन`साय रु`द्रं नभो"भिर्दे`वमसुरं दुवस्य॥ ३॥
tamuṣṭu`hi` yaḥ svi`ṣuḥ su`dhanvā` yo viśvasya` kṣayati bheṣa`jasya ।
yakṣvā"ma`he sau"mana`sāya ru`draṁ nabho"bhirde`vamasuraṁ duvasya ।। 3।।

अ`यं मे` हस्तो` भगवान`यं मे` भगवत्तरः।

अ`यं मे" वि`श्वभे"षजो`ऽयꣳ शि`वाभिमर्शनः॥ ४॥
a`yaṁ me` hasto` bhagavāna`yaṁ me` bhagavattaraḥ ।
a`yaṁ me" vi`śvabhe"ṣajo`'yaꣳ śi`vābhimarśanaḥ ।। 4।।

ये ते स`हस्रम`युत`ं पाशा` मृत्यो` मर्त्याय` हन्तवे।

तान् य`ज्ञस्य मा`यया` सर्वा`नव यजामहे।

मृ`त्यवे` स्वाहा मृ`त्यवे` स्वाहा"॥ ५॥
ye te sa`hasrama`yuta`ṁ pāśā` mṛtyo` martyāya` hantave ।
tān ya`jñasya mā`yayā` sarvā`nava yajāmahe ।
mṛ`tyave` svāhā mṛ`tyave` svāhā" ।। 5।।

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पा`हि।

प्राणानां ग्रन्थिरसि रुद्रो मा विशा`न्तकः।

तेनान्नेना"प्याय`स्व॥ ६॥

नमो रुद्राय विष्णवे मृत्युर्मे पा`हि
oṁ namo bhagavate rudrāya viṣṇave mṛtyurme pā`hi ।
prāṇānāṁ granthirasi rudro mā viśā`ntakaḥ ।
tenānnenā"pyāya`sva ।। 6।।
namo rudrāya viṣṇave mṛtyurme pā`hi

॥ ओं शान्ति`ः शान्ति`ः शान्तिः॥
।। oṁ śānti`ḥ śānti`ḥ śāntiḥ ।।

